# shrI subrahmaNyAShTottarashatanAmastotram

# શ્રીસુબ્રહ્મણ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : subrahmaNyAShTottarashatanAmastotram

File name : subrahmaNyAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, subrahmanya, stotra

Location : doc_subrahmanya

Author : Traditional

Transliterated by : Satish Bharadwaj satish_uma at hotmail.com

Proofread by : Satish Bharadwaj satish_uma at hotmail.com

Latest update : September 8, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

સ્કંદોગુહ ષણ્મુખશ્ચ ભાલનેત્રસુતઃ પ્રભુઃ ।
પિંગલઃ કૃત્તિકાસૂનુઃ શિખિવાહો દ્વિષડ્ભુજઃ ॥ ૧॥

દ્વિષણ્ણેત્રશ્શક્તિધરઃ પિશિતાશા પ્રભંજનઃ ।
તારકાસુરસંહારિ રક્ષોબલવિમર્દનઃ ॥ ૨॥

મત્તઃ પ્રમત્તોન્મત્તશ્ચ સુરસૈન્ય સુરક્ષકઃ ।
દેવસેનાપતિઃ પ્રાજ્ઞઃ કૃપાલો ભક્તવત્સલઃ ॥ ૩॥

ઉમાસુતશ્શક્તિધરઃ કુમારઃ ક્રૌંચધારિણઃ ।
સેનાનીરગ્નિજન્મા ચ વિશાખશ્શંકરાત્મજઃ ॥ ૪॥

શિવસ્વામિ ગણસ્વામિ સર્વસ્વામિ સનાતનઃ ।
અનંતમૂર્તિરક્ષોભ્યઃ પાર્વતી પ્રિયનંદનઃ ॥ ૫॥

ગંગાસુતશ્શરોદ્ભૂત આહૂતઃ પાવકાત્મજઃ ।
જૃંભઃ પ્રજૃંભઃ ઉજ્જૃંભઃ કમલાસન સંસ્તુતઃ ॥ ૬॥

એકવર્ણો દ્વિવર્ણશ્ચ ત્રિવર્ણસ્સુમનોહરઃ ।
ચતુર્વર્ણઃ પંચવર્ણઃ પ્રજાપતિરહહ્પતિઃ ॥ ૭॥

અગ્નિગર્ભશ્શમીગર્ભો વિશ્વરેતાસ્સુરારિહા ।
હરિદ્વર્ણશ્શુભકરો વટુશ્ચ પટુવેષભૃત્ ॥ ૮॥

પૂષાગભસ્તિર્ગહનો ચંદ્રવર્ણ કલાધરઃ ।
માયાધરો મહામાયી કૈવલ્ય શ્શંકરાત્મજઃ ॥ ૯॥

વિશ્વયોનિરમેયાત્મા તેજોયોનિરનામયઃ ।
પરમેષ્ઠી પરબ્રહ્મ વેદગર્ભો વિરાટ્સુતઃ ॥ ૧૦॥

પુલિંદ કન્યાભર્તાચ મહાસારસ્વતવૃતઃ ।
અશ્રિતાખિલદાતાચ ચોરઘ્નો રોગનાશનઃ ॥ ૧૧॥

અનંતમૂર્તિરાનંદશ્શિખંડીકૃતકેતનઃ ।
ડંભઃ પરમડંભશ્ચ મહાડંભોવૃષાકપિઃ ॥ ૧૨॥

કારણોત્પત્તિદેહશ્ચ કારણાતીત વિગ્રહઃ ।
અનીશ્વરોઽમૃતઃપ્રાણઃ પ્રાણાયામ પરાયણઃ ॥ ૧૩॥

વિરુદ્ધહંત વીરઘ્નો રક્તશ્યામગલોઽપિચ ।
સુબ્રહ્મણ્યો ગુહપ્રીતઃ બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૧૪॥

। ઇતિ શ્રી સુબ્રહ્મણ્યાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*shrI subrahmaNyAShTottarashatanAmastotram*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*